Shri Maharaj nI Shrirajarajeshwari Sahasranamavalih 1000 Names

# श्रीमहाराज्ञी श्रीराजराजेश्वरी सहस्रनामावलिः

## Document Information

Text title : shrImahArAjnI rAjarAjeshvarI sahasranamavali 1000 names

File name : mahArAjnIsahasranAmAvaliH.itx

Category : sahasranAmAvalI, devii, otherforms, devI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : See corresponding sahasranAmastotram

Latest update : August 5, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 26, 2023

*sanskritdocuments.org*

# श्रीमहाराज्ञी श्रीराजराजेश्वरी सहस्रनामावलिः

पार्वत्युवाच -
भगवन् वेदतत्त्वज्ञ मन्त्रतन्त्रविचक्षण ।
शरण्य सर्वलोकेश शरणागतवत्सल ॥ १॥

कथं श्रियमवाप्नोति लोके दारिद्र्यदुःखभाक् ।
मान्त्रिको भैरवेशान तन्मे गदितुमर्हसि ॥ २॥

श्रीशिव उवाच -
या देवी निष्कला राज्ञी भगवत्यमलेश्वरी ।
सा सृजत्यवति व्यक्तं संहरिष्यति तामसी ॥ ३॥

तस्या नामसहस्रं ते वक्ष्ये स्नेहेन पार्वति ।
अवाच्यं दुर्लभं लोके दुःखदारिद्र्यनाशनम् ॥ ४॥

परमार्थप्रदं नित्यं परमैश्वर्यकारणम् ।
सर्वागमरहस्याढ्यं सकलार्थप्रदीपकम् ॥ ५॥

समस्तशोकशमनं महापातकनाशनम् ।
सर्वमन्त्रमयं दिव्यं राज्ञीनामसहस्रकम् ॥ ६॥

ॐ अस्य श्रीमहाराज्ञी राजराजेश्वरी नामसहस्रस्य ब्रह्मा ऋषिः ।
गायत्री छन्दः । सर्वभूतेश्वरी महाराज्ञी देवता । ह्रीं बीजम् ।
सौः शक्तिः । क्लीं कीलकम् । श्रीमहाराज्ञीसहस्रनामजपे विनियोगः ।
ॐ ह्रां ह्रीं इत्यादिना कर-हृदयादि न्यासः ।

ब्रह्मऋषये नमः शिरसि । गायत्रीच्छन्दसे नमः मुखे ।
श्रीभूतेश्वरीमहाराज्ञीदेवतायै नमः हृदि ।
ह्रींबीजाय नमः नाभौ । सौः शक्तये नमः गुह्ये ।
क्लीं कीलकाय नमः पादयोः । विनियोगाय नमः सर्वाङ्गेषु ।
ॐह्रामित्यादिना करषडङ्गन्यासं विधाय ध्यानं कुर्यात् ।

॥ ध्यानम् ॥

या द्वादशार्कपरिमण्डितमूर्तिरेका
सिंहासनस्थितिमती ह्युरगैर्वृतां च ।
देवीमनन्यगतिरीश्वरतां प्रपन्नां var देवीमनक्षगतिमीश्वरतां
तां नौमि भर्गवपुषीं परमार्थराज्ञीम् ॥ १॥

चतुर्भुजां चन्द्रकलार्धशेखरां सिंहासनस्थामुरगोपवीतिनीम् ।
var सिंहासनस्थां भुजगोपवीतिनीम् पाशाङ्कुशाम्भोरुहखड्गधारिणीं
राज्ञीं भजे चेतसि राज्यदायिनीम् ॥ २॥

ॐ ह्रीं श्रीं रां महाराज्ञी क्लीं सौः पञ्चदशाक्षरी ।

अथ सहस्रनामावलिः ।
ॐ भास्वत्यै । भद्रिकायै । भीमायै । भर्गरूपायै । मनस्विन्यै ।
माननीयायै । मनीषायै । मनोजायै । मनोजवायै । मानदायै ।
मन्त्रविद्यायै । महाविद्यायै । षडक्षर्यै । षट्कूटायै । त्रिकूटायै ।
त्रय्यै । वेदत्रय्यै । शिवायै । शिवाकारायै । विरूपाक्ष्यै नमः । २०

ॐ शशिखण्डावतंसिन्यै नमः । महालक्ष्म्यै । महोरस्कायै ।
महौजस्कायै । महोदयायै । मातङ्ग्यै । मोदकाहारायै ।
मदिरारुणलोचनायै । साध्व्यै । शीलवत्यै । शालायै ।
सुधाकलशधारिण्यै । खड्गिन्यै । पद्मिन्यै । पद्मायै ।
पद्मकिञ्जल्करञ्जितायै । हृत्पद्मवासिन्यै । हृद्यायै ।
पानपात्रधरायै । परायै नमः । ४०

ॐ धराधरेन्द्रतनयायै नमः । दक्षिणायै । दक्षजायै । दयायै ।
दयावत्यै । महामेधायै । मोदिन्यै । सदा बोधिन्यै । गदाधरार्चितायै ।
गोधायै । गङ्गायै । गोदावर्यै । गयायै । महाप्रभावसहितायै ।
महोरगविभूषणायै । महामुनिकृतातिथ्यायै । माध्व्यै । मानवत्यै ।
मघायै । बालायै नमः । ६०

ॐ सरस्वत्यै नमः । लक्ष्म्यै । दुर्गायै । दुर्गतिनाशिन्यै ।
शार्यै । शरीरमध्यस्थायै । वैखर्यै । खेचरेश्वर्यै ।
शिवदायै । शिववक्षःस्थायै । कालिकायै । त्रिपुरेश्वर्यै ।
पुरारिकुक्षिमध्यस्थायै । मुरारिहृदयेश्वर्यै । बलारिराज्यदायै ।
चण्ड्यै । चामुण्डायै । मुण्डधारिण्यै । मुण्डमालाञ्चितायै ।

मुद्रायै नमः । ८०

ॐ क्षोभणाकर्षणक्षमायै नमः । ब्राह्म्यै । नारायण्यै । देव्यै ।
कौमार्यै । अपराजितायै । रुद्राण्यै । शच्यै । इन्द्राण्यै । वाराह्यै ।
वीरसुन्दर्यै । नारसिंह्यै । भैरवेश्यै । भैरवाकारभीषणायै ।
नागालङ्कारशोभाढ्यायै । नागयज्ञोपवीतिन्यै । नागकङ्कणकेयूरायै ।
नागहारायै । सुरेश्वर्यै । सुरारिघातिन्यै नमः । १००

ॐ पूतायै नमः । पूतनायै । डाकिन्यै । क्रियायै । कूर्मायै । क्रियावत्यै ।
कृत्यायै । डाकिन्यै । लाकिन्यै । लयायै । लीलावत्यै । रसाकीर्णायै ।
नागकन्यायै । मनोहरायै । हारकङ्कणशोभाढ्यायै । सदानन्दायै ।
शुभङ्कर्यै । महासिन्यै । मधुमत्यै । सरस्यै नमः । १२०

ॐ स्मरमोहिन्यै नमः । महोग्रवपुष्यै । वार्तायै । वामाचारप्रियायै ।
सिरायै । सुधामय्यै । वेणुकरायै । वैरघ्न्यै । वीरसुन्दर्यै ।
वारिमध्यस्थितायै । वामायै । वामनेत्रायै । शशिप्रभायै ।
शङ्कर्यै । शर्मदायै । सीतायै । रवीन्दुशिखिलोचनायै । मदिरायै ।
वारुण्यै । वीणागीतिज्ञायै नमः । १४०

ॐ मदिरावत्यै नमः । वटस्थायै । वारुणीशक्त्यै । वटजायै ।
वटवासिन्यै । वटुक्यै । वीरसुवे । वन्द्यायै । स्तम्भिन्यै ।
मोहिन्यै । चमवे । मुद्गराङ्कुशहस्तायै । वराभयकरायै । कुट्यै ।
पाटीरद्रुमवल्ल्यै । वटुकायै । वटुकेश्वर्यै । इष्टदायै । कृषिभुवे ।
कीर्यै नमः । १६०

ॐ रेवत्यै नमः । रमणप्रियायै । रोहिण्यै । रेवत्यै । रम्यायै ।
रमणायै । रोमहर्षिण्यै । रसोल्लासायै । रसासारायै । सारिण्यै ।
तारिण्यै । तडिते । तर्यै । तरित्रहस्तायै । तोतुलायै । तरणिप्रभायै ।
रत्नाकरप्रियायै । रम्भायै । रत्नालङ्कारशोभितायै ।
रुक्माङ्गदायै नमः । १८०

ॐ गदाहस्तायै नमः । गदाधरवरप्रदायै । षड्रसायै । द्विरसायै ।
मालायै । मालाभरणभूषितायै । मालत्यै । मल्लिकामोदायै ।
मोदकाहारवल्लभायै । वल्लभ्यै । मधुरायै । मायायै । काश्यै ।
काञ्च्यै । ललन्तिकायै । हसन्तिकायै । हसन्त्यै । भ्रमन्त्यै ।
वसन्तिकायै । क्षेमायै नमः । २००

ॐ क्षेमङ्कर्यै नमः । क्षामायै । क्षौमवस्त्रायै । क्षणेश्वर्यै ।
क्षणदायै । क्षेमदायै । सीरायै । सीरपाणिसमर्चितायै । क्रीतायै ।
क्रीतातपायै । क्रूरायै । कमनीयायै । कुलेश्वर्यै । कूर्चबीजायै ।
कुठाराढ्यायै । कूर्मिण्यै । कूर्मसुन्दर्यै । कारुण्यार्द्रायै । काश्मीर्यै ।
दूत्यै नमः । २२०

ॐ द्वारवत्यै नमः । ध्रुवायै । ध्रुवस्तुतायै । ध्रुवगत्यै ।
पीठेश्यै । बगलामुख्यै । सुमुख्यै । शोभनायै । नीत्यै ।
रत्नज्वालामुख्यै । नत्यै । अलकायै । उज्जयिन्यै । भोग्यायै । भङ्ग्यै ।
भोगावत्यै । बलायै । धर्मराजपुर्यै । पूतायै । पूर्णमालायै नमः । २४०

ॐ अमरावत्यै नमः । अयोध्यायै । बोधनीयायै । युगमात्रे । यक्षिण्यै ।
यज्ञेश्वर्यै । योगगम्यायै । योगिध्येयायै । यशस्विन्यै । यशोवत्यै ।
चार्वङ्ग्यै । चारुहासायै । चलाचलायै । हरीश्वर्यै । हरेर्मायायै ।
भामिन्यै । वायुवेगिन्यै । अम्बालिकायै । अम्बायै । भर्गेश्यै नमः । २६०

ॐ भृगुकूटायै नमः । महामत्यै । कोशेश्वर्यै । कमलायै ।
कीर्तिदायै । कीर्तिवर्धिन्यै । कठोरवाचे । कुहूमूर्त्यै ।
चन्द्रबिम्बसमाननायै । चन्द्रकुङ्कुमलिप्ताङ्ग्यै । कनकाचलवासिन्यै ।
मलयाचलसानुस्थायै । हिमाद्रितनयातन्वै । हिमाद्रिकुक्षिदेशस्थायै ।
कुब्जिकायै । कोसलेश्वर्यै । कारैकनिगलायै । गूढायै ।
गूढगुल्फायै । अतिवेगिन्यै नमः । २८०

ॐ तनुजायै नमः । तनुरूपायै । बाणचापधरायै । नुत्यै । धुरीणायै ।
धूम्रवाराह्यै । धूम्रकेशायै । अरुणाननायै । अरुणेश्यै । द्युत्यै ।
ख्यात्यै । गरिष्ठायै । गरीयस्यै । महानस्यै । महाकारायै ।
सुरासुरभयङ्कर्यै । अणुरूपायै । बृहज्ज्योतिषे । अनिरुद्धायै ।
सरस्वत्यै नमः । ३००

ॐ श्यामायै नमः । श्याममुख्यै । शान्तायै । श्रान्तसन्तापहारिण्यै ।
गवे । गण्यायै । गोमय्यै । गुह्यायै । गोमत्यै । गरुवाचे ।
रसायै । गीतसन्तोषसंसक्तायै । गृहिण्यै । ग्राहिण्यै । गुहायै ।
गणप्रियायै । गजगत्यै । गान्धार्यै । गन्धमोदिन्यै गन्धमोहिन्यै ।
गन्धमादनसानुस्थायै नमः । ३२०

ॐ सह्याचलकृतालयायै नमः । गजाननप्रियायै । गम्यायै । ग्राहिकायै ।

ग्राहवाहनायै । गुहप्रसुवे । गुहावासायै । गृहमालाविभूषणायै ।
कौबेर्यै । कुहकायै । भ्रन्तये । तर्कविद्याप्रियङ्कर्यै । पीताम्बरायै ।
पटाकारायै । पताकायै । सृष्टिजायै । सुधायै । दाक्षायण्यै ।
दक्षसुतायै । दक्षयज्ञविनाशिन्यै नमः । ३४०

ॐ ताराचक्रस्थितायै नमः । तारायै । तुरीतुर्यायै । त्रुटये । तुलायै ।
सन्ध्यात्रय्यै । सन्धिजरायै । सन्ध्यायै । तारुण्यलालितायै । ललितायै ।
लोहितायै । लभ्यायै । चम्पायै । कम्पाकुलायै । सृण्यै । सृत्यै ।
सत्यवत्यै । स्वस्थायै । असमानायै । मानवर्धिन्यै नमः । ३६०

ॐ महोमय्यै नमः । मनस्तुष्ट्यै । कामधेनवे । सनातन्यै ।
सूक्ष्मरूपायै । सूक्ष्ममुख्यै । स्थूलरूपायै । कलावत्यै ।
तलातलाश्रयायै । सिन्धवे । त्र्यम्बिकायै । लम्पिकायै । जयायै ।
सौदामिन्यै । सुधादेव्यै । सनकदिसमर्चितायै । मन्दाकिन्यै ।
यमुनायै । विपाशायै । नर्मदानद्यै नमः । ३८०

ॐ गण्डक्यै नमः । ऐरावत्यै । सिप्रायै । वितस्तायै । सरस्वत्यै ।
रेवायै । इक्षुमत्यै । वेगवत्यै । सागरवासिन्यै । देवक्यै । देवमात्रे ।
देवेश्यै । देवसुन्दर्यै । दैत्येश्यै । दमन्यै । दात्र्यै । दितये ।
दतिजसुन्दर्यै । विद्याधर्यै । विद्येश्यै नमः । ४००

ॐ विद्याधरजसुन्दर्यै नमः । मेनकायै । चित्रलेखायै । चित्रिण्यै ।
तिलोत्तमायै । उर्वश्यै । मोहिन्यै । रम्भायै । अप्सरोगणसुन्दर्यै ।
यक्षिण्यै । यक्षलोकेश्यै । यक्षनायकसुन्दर्यै यक्षेन्द्रतनयायै
योग्यायै । गन्धवत्यर्चितायै । गन्धायै । सुगन्धायै । गीततत्परायै ।
गन्धर्वतनयायै । नम्रायै । गीत्यै । गन्धर्वसुन्दर्यै नमः । ४२०

ॐ मन्दोदर्यै नमः । करालाक्ष्यै । मेघनादवरप्रदायै ।
मेघवाहनसन्तुष्टायै । मेघमूर्त्यै । राक्षस्यै । रक्षोहर्त्र्यै ।
केकस्यै । रक्षोनायकसुन्दर्यै । किन्नर्यै । कम्बुकण्ठ्यै ।
कलकण्ठस्वनायै । अमृतायै । किम्मुख्यै । हयवक्त्रायै । खेलायै ।
किन्नरसुन्दर्यै । विपाश्यै । राजमातङ्ग्यै ।
उच्छिष्टपदसंस्थितायै नमः । ४४०

ॐ महापिशाचिन्यै नमः । चान्द्यै । पिशाचकुलसुन्दर्यै ।
गुह्येश्वर्यै । गुह्यरूपायै । गुर्व्यै । गुह्यकसुन्दर्यै । सिद्धिप्रदायै ।

सिद्धवध्वै । सिद्धेश्यै । सिद्धसुन्दर्यै । भूतेश्वर्यै ।
भूतलयायै । भूतधात्र्यै । भयापहायै । भूतभीतिहर्यै । भव्यायै ।
भूतजायै । भूतसुन्दर्यै । पृथ्व्यै नमः । ४६०

ॐ पार्थिवलोकेश्यै नमः । प्रथायै । विष्णुसमर्चितायै ।
वसुन्धरायै । वसुनतायै । पर्थिव्यै । भूमिसुन्दर्यै ।
अम्भोधितनयायै । अलुब्धायै । जलजाक्ष्यै । जलेश्वर्यै । अमूर्त्यै ।
अम्मय्यै । मार्यै । जलस्थायै । जलसुन्दर्यै । तेजस्विन्यै ।
महोधात्र्यै । तैजस्यै । सूर्यबिम्बगायै नमः । ४८०

ॐ सूर्यकान्त्यै नमः । सूर्यतेजसे । तेजोरूपैकसुन्दर्यै । वायुवाहायै ।
वायुमुख्यै । वायुलोकैकसुन्दर्यै । गगनस्थायै । खेचरेश्यै ।
शून्यरूपायै शूररूपायै । निराकृत्यै । निराभासायै । भासमानायै ।
धृत्यै द्युत्यै । आकाशसुन्दर्यै । क्षितिमूर्तिधरायै । अनन्तायै ।
क्षितिभृल्लोकसुन्दर्यै । अब्धियानायै । रत्नशोभायै ।
वरुणेश्यै नमः । ५००

ॐ वरायुधायै नमः । पाशहस्तायै । पोषणायै । वरुणेश्वरसुन्दर्यै ।
अनलैकरुचये । ज्योत्यै । पञ्चानिलमतिस्थित्यै ।
प्राणापानसमानेच्छायै । चोदानव्यानरूपिण्यै । पञ्चवातगतये ।
नाडीरूपिण्यै । वातसुन्दर्यै । अग्निरूपायै । वह्निशिखायै ।
वडवानलसन्निभ्नायै । हेतये । हविषे । हुतज्योतिषे । अग्निजायै ।
वह्निसुन्दर्यै नमः । ५२०

ॐ सोमेश्वर्यै नमः । सोमकलायै । सोमपानपरायणायै । सौम्याननायै ।
सौम्यरूपायै । सोमस्थायै । सोमसुन्दर्यै । सूर्यप्रभायै । सूर्यमुख्यै ।
सूर्यजायै । सूर्यसुन्दर्यै । याज्ञिक्यै । यज्ञभागेच्छायै ।
यजमानवरप्रदायै । याजक्यै । यज्ञविद्यायै । यजमानैकसुन्दर्यै ।
आकाशगामिन्यै । वन्द्यायै । शब्दजायै नमः । ५४०

ॐ आकाशसुन्दर्यै नमः । मीनास्यायै । मीननेत्रायै । मीनास्थायै ।
मीनसुन्दर्यै । कूर्मपृष्ठगतायै । कूर्म्यै । कूर्मजायै ।
कूर्मसुन्दर्यै । वाराह्यै । वीरसुवे । वन्द्यायै । वरारोहायै ।
मृगेक्षणायै । वराहमूर्तये । वाचालायै । वश्यायै । वराहसुन्दर्यै ।
नरसिंहाकृतये । देव्यै नमः । ५६०

ॐ दुष्टदैत्यनिषूदिन्यै नमः । प्रद्युम्नवरदायै । नार्यै ।
नरसिंहैकसुन्दर्यै । वामजायै । वामनाकारायै । नारायणपरायणायै ।
बलिदानवदर्पघ्न्यै । वाम्यायै । वामनसुन्दर्यै । रामप्रियायै ।
रामकलायै । रक्षोवंशक्षयभयङ्कर्यै । भृगुपुत्र्यै ।
राजकन्यायै । रामायै । परशुधारिण्यै । भार्गव्यै । भार्गवेष्टायै ।
जामदग्न्यवरप्रदायै नमः । ५८०

ॐ कुठारधारिण्यै नमः । रात्र्यै । जामदग्न्यैकसुन्दर्यै ।
सीतालक्ष्मणसेव्यायै । रक्षःकुलविनाशिन्यै । रामप्रियायै ।
शत्रुघ्न्यै । शत्रुघ्नभरतेष्टदायै । लावण्यामृतधाराढ्यायै ।
लवणासुरघातिन्यै । लोहितास्यायै । प्रसन्नास्यायै ।
स्वात्मारामैकसुन्दर्यै । कृष्णकेशायै । कृष्णमुख्यै ।
यादवान्तकर्यै । लयायै । यादोगणार्चितायै । योज्यायै । राधायै नमः । ६००

ॐ श्रीकृष्णसुन्दर्यै नमः । सिद्धप्रसुवे । सिद्धदेव्यै ।
जिनमार्गपरायणायै । जितक्रोधायै । जितालस्यायै । जिनसेव्यायै ।
जितेन्द्रियायै । जिनवंशधरायै । उग्रायै । नीलान्तायै । बुद्धसुन्दर्यै ।
काल्यै । कोलाहलप्रीतायै । प्रेतवाहायै । सुरेश्वर्यै । कल्किप्रियायै ।
कम्बुधरायै । कलिकालैकसुन्दर्यै । विष्णुमायायै नमः । ६२०

ॐ ब्रह्ममायायै नमः । शाम्भव्यै । शिववाहनायै ।
इन्द्रावरजवक्षःस्थायै । स्थाणुपत्न्यै । पलालिन्यै । जृम्भिण्यै ।
जृम्भहर्त्र्यै । जृम्भमाणालकाकुलायै । कुलाकुलफलेशान्यै ।
पददानफलप्रदायै । कुलवागीश्वर्यै । कुल्यायै । कुलजायै ।
कुलसुन्दर्यै । पुरन्दरेड्यायै । तारुण्यालयायै । पुण्यजनेश्वर्यै ।
पुण्योत्साहायै । पापहन्त्र्यै नमः । ६४०

ॐ पाकशासनसुन्दर्यै नमः । सूर्यकोटिप्रतीकाशायै । सूर्यतेजोमय्यै ।
मत्यै । लेखिन्यै । भ्राजिन्यै । रज्जुरूपिण्यै । सूर्यसुन्दर्यै ।
चन्द्रिकायै । सुधाधारायै । ज्योत्स्नायै । शीतांशुसुन्दर्यै । लोलाक्ष्यै ।
शताक्ष्यै । सहस्राक्ष्यै । सहस्रपदे । सहस्रशीर्षायै । इन्द्राण्यै ।
सहस्रभुजवल्लिकायै । कोटिरत्नांशुशोभायै नमः । ६६०

ॐ शुभ्रवस्त्रायै नमः । शताननायै । शतानन्दायै । श्रुतिधरायै ।
पिङ्गलायै । उग्रनादिन्यै । सुषुम्नायै । हारकेयूरनूपुरारावसङ्कुलायै ।

घोरनादायै । अघोरमुख्यै । उन्मुख्यै । उल्मूकायुधायै । गोपीतायै ।
गूर्जर्यै । गोधायै । गायत्र्यै । वेदवल्लभायै । वल्लकीस्वननादायै ।
नादविद्यायै । नदीतट्यै नमः । ६८०

ॐ बिन्दुरूपायै नमः । चक्रयोनये । बिन्दुनादस्वरूपिण्यै ।
चक्रेश्वर्यै । भैरवेश्यै । महाभैरववल्लभायै ।
कालभैरवभार्यायै । कल्पान्ते रङ्गनर्तक्यै ।
प्रलयानलधूम्राभायै । योनिमध्यकृतालयायै । भूचर्यै ।
खेचरीमुद्रायै । नवमुद्राविलासिन्यै । वियोगिन्यै । श्मशानस्थायै ।
श्मशानार्चनतोषितायै । भास्वराङ्ग्यै । भर्गशिखायै ।
भर्गवामाङ्गवासिन्यै । भद्रकाल्यै नमः । ७००

ॐ विश्वकाल्यै नमः । श्रीकाल्यै । मेघकालिकायै । नीरकाल्यै ।
कालरात्र्यै । काल्यै । कामेशकालिकायै । इन्द्रकाल्यै । पूर्वकाल्यै ।
पश्चिमाम्नायकालिकायै । श्मशानकालिकायै । शुभ्रकाल्यै ।
श्रीकृष्णकालिकायै । क्रीङ्कारोत्तरकाल्यै । श्रीं हुं ह्रीं
दक्षिणकालिकायै । सुन्दर्यै । त्रिपुरेशान्यै । त्रिकूटायै ।
त्रिपुरार्चितायै । त्रिनेत्रायै नमः । ७२०

ॐ त्रिपुराध्यक्षायै नमः । त्रिकूटायै । कूटभैरव्यै ।
त्रिलोकजनन्यै । नेत्र्यै । महात्रिपूरसुन्दर्यै । कामेश्वर्यै ।
कामकलायै । कालकामेशसुन्दर्यै । त्र्यक्षर्य्यै । एकाक्षरीदेव्यै ।
भावनायै । भुवनेश्वर्यै । एकाक्षर्यै । चतुष्कूटायै । त्रिकूटेश्यै ।
लयेश्वर्यै । चतुर्वर्णायै । वर्णेश्यै । वर्णाढ्यायै नमः । ७४०

ॐ चतुरक्षर्यै नमः । पञ्चाक्षर्यै । षड्वक्रायै । षट्कूटायै ।
षडक्षर्यै । सप्ताक्षर्यै । नवार्णेश्यै । परमाष्टाक्षरेश्वर्यै ।
नवम्यै । पञ्चम्यै । षष्ठ्यै । नागेश्यै । नवनायिकायै ।
दशाक्षर्यै । दशास्येश्यै । देविकायै । एकादशाक्षर्यै ।
द्वादशादित्यसङ्काशायै । द्वादश्यै । द्वादशाक्षर्यै नमः । ७६०

ॐ त्रयोदश्यै नमः । वेदगर्भायै । वाद्यायै ब्राह्म्यै ।
त्रयोदशाक्षर्यै । चतुर्दशाक्षरीविद्यायै । पञ्चदशाक्षर्यै ।
श्रीषोडश्यै । सर्वविद्येश्यै । महाश्रीषोडशाक्षर्यै ।
महाश्रीषोडशीरूपायै । चिन्तामणिमनुप्रियायै । द्वाविंशत्यक्षर्यै ।

श्यामायै । महाकालकुटुम्बिन्यै । वज्रतारायै । कालतारायै । नारीतारायै ।
उग्रतारिण्यै । कामतारायै । स्पर्शतारायै नमः । ७८०

ॐ शब्दतारायै नमः । रसाश्रयायै । रूपतारायै । गन्धतारायै ।
महानीलसरस्वत्यै । कालज्वालायै । वह्निज्वालायै । ब्रह्मज्वालायै ।
जटाकुलायै । विष्णुज्वालायै । विष्णुशिखायै । भद्रज्वालायै ।
करालिन्यै । विकरालमुखीदेव्यै । कराल्यै । भूतिभूषणायै ।
चिताशयासनाचिन्त्यायै । चितामण्डलमध्यगायै । भूतभैरवसेव्यायै ।
भूतभैरवपालिन्यै नमः । ८००

ॐ बन्धक्यै नमः । बद्धसन्मुद्रायै । भवबन्धविनाशिन्यै ।
भवान्यै । देवदेवेश्यै । दीक्षायै । दीक्षितपूजितायै । साधकेश्यै ।
सिद्धिदात्र्यै । साधकानन्दवर्धिन्यै । साधकाश्रयभूतायै ।
साधकेष्टफलप्रदायै । रजोवत्यै । राजस्यै । रजक्यै ।
रजस्वलायै । पुष्पप्रियायै । पुष्पपूर्णायै । स्वयम्भूपुष्पमालिकायै ।
स्वयम्भूपुष्पगन्धाढ्यायै नमः । ८२०

ॐ पुलस्त्यसुतनाशिन्यै नमः । पात्रहस्तायै । परायै । पौत्र्यै ।
पीतास्यायै । पीतभूषणायै । पिङ्गाननायै । पिङ्गकेश्यै ।
पिङ्गलायै । पिङ्गलेश्वर्यै । मङ्गलायै । मङ्गलेशान्यै ।
सर्वमङ्गलमङ्गलायै । पुरूरवेश्वर्यै । पाशधरायै । चापधरायै ।
अधुरायै । पुण्यधात्र्यै । पुण्यमय्यै । पुण्यलोकनिवासिन्यै नमः । ८४०

ॐ होतृसेव्यायै नमः । हकारस्थायै । सकारस्थायै । सुखावत्यै ।
सख्यै । शोभावत्यै । सत्यायै । सत्याचारपरायणायै । साध्व्यै ।
ईशानकशान्यै । वामदेवकलाश्रितायै । सद्योजातकलेशान्यै । शिवायै ।
अघोरकलाकृत्यै । शर्वर्यै । वीरसदृश्यै । क्षीरनीरविवेचिन्यै ।
वितर्कनिलयायै । नित्यायै । नित्यक्लिन्नायै नमः । ८६०

ॐ पराम्बिकायै नमः । पुरारिदयितायै । दीर्घायै । दीर्घनासायै ।
अल्पभाषिण्यै । काशिकायै । कौशिक्यै । कोश्यायै । कोशदायै ।
रूपवर्धिन्यै । तुष्ट्यै । पुष्ट्यै । प्रजाप्रीतायै । पूजितायै ।
पूजकप्रियायै । प्रजावत्यै । गर्भवत्यै । गर्भपोषणकारिण्यै ।
शुक्रवाससे । शुक्लरूपायै नमः । ८८०

ॐ शुचिवासायै नमः । जयावहायै । जानक्यै । जन्यजनकायै ।

जनतोषणतत्परायै । वादप्रियायै । वाद्यरतायै । वादिन्यै ।
वादसुन्दर्यै । वाक्स्तम्भिन्यै । कीरपाण्यै । धीराधीरायै ।
धुरन्धरायै । स्तनन्धय्यै । सामिधेन्यै । निरानन्दायै । निरञ्जनायै ।
समस्तसुखदायै । सारायै । वारान्निधिवरप्रदायै नमः । ९००

ॐ वालुकायै नमः । वीरपानेष्टायै । वसुधात्र्यै । वसुप्रियायै ।
शुक्रानन्दायै । शुक्ररसायै । शुक्रपूज्यायै । शुकप्रियायै ।
शुच्यै । शुकहस्तायै । समस्तनरकान्तकायै । समस्ततत्त्वनिलयायै ।
भगरूपायै । भगेश्वर्यै । भगबिम्बायै । भगायै । हृद्यायै ।
भगलिङ्गस्वरूपिण्यै । भगलिङ्गेश्वर्यै । श्रीदायै नमः । ९२०

ॐ भगलिङ्गामृतस्रवायै नमः । क्षीराशनायै । क्षीररुच्यै ।
आज्यपानपरायणायै । मधुपानपरायै । प्रौढायै । पीवरांसायै ।
परावरायै । पिलम्पिलायै । पटोलेशायै । पाटलारुणलोचनायै ।
क्षीराम्बुधिप्रियायै । क्षिप्रायै । सरलायै । सरलायुधायै ।
सङ्ग्रामायै । सुनयायै । स्रस्तायै । संसृत्यै । सनकेश्वर्यै नमः । ९४०

ॐ कन्यायै नमः । कनकरेखायै । कान्यकुब्जनिवासिन्यै ।
काञ्चनोभतनवे । काष्ठायै । कुष्ठरोगनिवारिण्यै ।
कठोरमूर्धजायै । कुन्त्यै । कुन्तायुधधरायै । धृत्यै ।
चर्माम्बरायै । क्रूरनखायै । चकोराक्ष्यै । चतुर्भुजायै ।
चतुर्वेदप्रियायै । आद्यायै । चतुर्वर्गफलप्रदायै ।
ब्रह्माण्डचारिण्यै । स्फुर्त्यै । ब्रह्माण्यै नमः । ९६०

ॐ ब्रह्मसम्मतायै नमः । सत्कारकारिण्यै । सूत्यै । सूतिकायै ।
लतिकालयायै । कल्पवल्ल्यै । कृशाङ्ग्यै । कल्पपादपवासिन्यै ।
कल्पपाशायै । महाविद्यायै । विद्याराज्ञ्यै । सुखाश्रयायै ।
भूतिराज्ञ्यै । विश्वराज्ञ्यै । लोकराज्ञ्यै । शिवाश्रयायै ।
ब्रह्मराज्ञ्यै । विष्णुराज्ञ्यै । रुद्रराज्ञ्यै । जटाश्रयायै नमः । ९८०

ॐ नागराज्ञ्यै नमः । वंशराज्ञ्यै । वीरराज्ञ्यै । रजःप्रियायै ।
सत्त्वराज्ञ्यै । तमोराज्ञ्यै । गणराज्ञ्यै । चलाचलायै । वसुराज्ञ्यै ।
सत्यराज्ञ्यै । तपोराज्ञ्यै । जपप्रियायै । मन्त्रराज्ञ्यै ।
वेदराज्ञ्यै । तन्त्रराज्ञ्यै । श्रुतिप्रियायै । वेदराज्ञ्यै ।
मन्त्रिराज्ञ्यै । दैत्यराज्ञ्यै । दयाकरायै नमः । १०००

ॐ कालराज्यै नमः । प्रजाराज्यै । तेजोराज्यै । हराश्रयायै ।
पृथ्वीराज्यै । पयोराज्यै । वायुराज्यै । मदालसायै ।
सुधाराज्यै । सुराराज्यै । भीमराज्यै । भयोज्झितायै ।
तथ्यराज्यै । जयाराज्यै । महाराज्यै । महामत्त्यै । वामराज्यै ।
चीनराज्यै । हरिराज्यै । हरीश्वर्यै नमः । १०२०

ॐ पराराज्यै नमः । यक्षराज्यै । भूतराज्यै । शिवाश्रयायै ।
वटुराज्यै । प्रेतराज्यै । शेषराज्यै । शमप्रदायै ।
आकाशराज्यै । राजेश्यै । राजराज्यै । रतिप्रियायै । पातालराज्यै ।
भूराज्यै । प्रेतराज्यै । विषापहायै । सिद्धराज्यै । विभाराज्यै ।
तेजोराज्यै । विभामय्यै नमः । १०४०

ॐ भास्वद्राज्यै नमः । चन्द्रराज्यै । ताराराज्यै । सुवासिन्यै ।
गृहराज्यै । वृक्षराज्यै । लताराज्यै । मतिप्रदायै ।
वीरराज्यै । मनोराज्यै । मनुराज्यै । काश्यप्यै । मुनिराज्यै ।
रत्नराज्यै । मृगराज्यै । मणिप्रमायै । सिन्धुराज्यै ।
नदीराज्यै । नदराज्यै । दरीस्थितायै नमः । १०६०

ॐ नादराज्यै नमः । बिन्दुराज्यै । आत्मराज्यै । सद्गत्यै ।
पुत्रराज्यै । ध्यानराज्यै । लयराज्यै । सदेश्वर्यै ।
ईशानराज्यै । राजेश्यै । स्वाहाराज्यै । महत्तरायै । वह्निराज्यै ।
योगिराज्यै । यज्ञराज्यै । चिदाकृत्यै । जगद्राज्यै ।
तत्त्वराज्यै । वाग्राज्यै । विश्वरूपिण्यै । पञ्चदशाक्षरीराज्यै ।
ॐ ह्रीं भूतेश्वरेश्वर्यै नमः । १०८२

श्री महाराज्ञी षोडशेश्वरी श्रीराजराजजेश्वरी श्रीमात्रे नमो नमः ।

इति श्रीरुद्रयामले तन्त्रे दशविद्यारहस्ये श्रीमहाराज्ञी
श्रीराजराजेश्वरी सहस्रनामावलिः समाप्ता ।

Proofread by PSA Easwaran psawaswaran

*Shri Maharaj nI Shrirajarajeshwari Sahasranamavalih 1000 Names*

pdf was typeset on October 26, 2023

Please send corrections to *sanskrit@cheerful.com*